National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(61): 39-40
© 2025 NJHSR
www.sanskritarticle.com

डा.निराकार सामन्तरायः
पुराणेतिहासविद्याशाखा,
पूर्व शोधछात्र, राष्ट्रीयसंस्कृतविश्व-
विद्यालयः, तिरुपति

Correspondence:
डा.निराकार सामन्तरायः
पुराणेतिहासविद्याशाखा,
पूर्व शोधछात्र, राष्ट्रीयसंस्कृतविश्व-
विद्यालयः, तिरुपति

# दर्शनं पुरुषोत्तमे

डा.निराकार सामन्तरायः

**"तपस्या वदरिधाम्नि भ्रमणं गोकुले वने।**
**वाराणस्यां कृतो वासः दर्शनं पुरुषोत्तमे॥"**

प्रसिद्धोऽयं श्लोकः, पुरुषोत्तमे दर्शनस्य महत्वं प्रतिपादयति। शङ्खक्षेत्रे पुरुषोतमे क्षेत्रेऽस्मिन् श्रीजगन्नाथदर्शनं यथा महत्त्वं धन्ते न तथैव अन्यकर्मसु महत्त्वं विलोक्यते। उत्कलीयानां परमाराध्यः पुरुषोत्तमः श्रीजगन्नाथः शास्त्रेषु परमरहस्यमयदेवरूपेण प्रतिपादितः। सः एव स्वेच्छ्यास्य जगतः स्थितिसंयमोदयान् विदधाति। समस्यानां बडैश्वर्याणां मूर्त्तीमन्तप्रतीभुश्चायं वर्तते। एनं ये यथा भजन्ति तथैव ते तस्य स्वरूपमवलोकयन्ति। जगन्नाथक्षेत्रैव श्रीमद्भग-वङ्गीतायाः सप्रसिद्धवचनमिदं सत्यं भाति।

**थे यथा मां प्रपद्यन्ते तां तथैव भजाम्यहम्।**
**मम वर्त्मानुवर्तन्ते मनुष्याः पार्थसर्वशः॥** (गीता)

<u>**पुरुषोत्तमः श्री जगन्नाथ**</u> :-

"पुरुषोत्तमः" इति कथनेन भगवन्तं बोधयति, क्षेत्रमपि। भगवान् श्रीजगन्नाथः स्कन्द-पद्मब्रह्नादिषु तत्वप्रतिपादकेषु पुराणेषु पुरुषोत्तमः कीर्तितः, किञ्च तत् क्षेत्रमपि पुरूषोत्त-मक्षेत्रमित्युच्यते। भगवान् नन्दानन्दवर्द्धनः श्रीकृष्णचन्द्रः सर्वदर्शनसारे श्रीमद्भगवद्गीतायां पुरुषोत्तमः इति ख्यातः।

स ह्येव क्षरादतीतः अक्षरादपि च उत्तम इति तत्र प्रतिपादितोऽस्ति।

**यस्मात् क्षारमतीतोऽहमक्षरादपि चोत्तमः।**
**अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥** (गीता 15/18)

ईश्वरस्यानया उक्त्या प्रतीयते यत् सः एवास्ति पुरुषोत्तमः परमात्मा परमपुरुषः सच्चिदान-न्दघनः परंब्रह्मः, स ह्येव परमात्मापुरुषोत्तमक्षेत्रे दारुदेहेऽबतीर्णत्वात् दारुब्रह्मत्वेन कल्पितः। भगवता व्यासेन स्वस्य कृतिष्वनेकेषु स्थलेषु पुरुषोत्तमस्य महत् वर्णनमुपस्थापितम् श्रीपुरुषोतमधामनि दारुव्याजशरीरेणैव पूर्णानन्दमय ब्रह्मजः भगवतः श्रीजगन्नाथस्यावस्थितिः। भगवदर्शनप्रस्तावे यथा पद्मपुराणे-

**समुद्रस्योत्तरे तीरे आस्ते श्री पुरुषोतमे।**
**पूर्णानन्दमयं ब्रह्म दारुव्याजशरीरभूत्॥**

आर्यावर्ते समग्रस्य विश्वस्य जगतः नाथः प्रभुः यस्मात् स जगन्नाथः इति नाम्ना व्यपदिश्यते। एतस्मादेव कारणात् न केवलं भारतवर्षेऽपि तु समग्रे विश्वे पुरुषोतमक्षेत्रस्य महत्त्वमस्ति। सर्वतीर्थेषु धोत्रेषु च पुरुषोतमक्षेत्रं प्रधानम् अस्यक्षेत्रस्य सृष्टिर्नास्ति विलयोऽपि नास्ति –

**सागरस्योत्तरतीरे महानद्यास्तु दक्षिणे।**
**स प्रदेशो पृथिव्यां हि सर्वतीर्थवरप्रदः॥**
**क्षराक्षरमतिक्रम्य वर्तेऽहं पुरुषोत्तमे।**
**सृष्ट्यालयेन नाक्रान्तं क्षेत्रं मे पुरूषोत्तमः॥**

(वायुपुराणे)

दारुब्रह्मजगन्नाथात् पूर्वमपि अत्र भगवतः अन्या प्रतिमा पूजिता आसीत् । यस्याः उल्लेखः स्कन्दपुराणे कृतं वर्तते।

**तदा तु तनवो विष्णोः प्रतिष्ठात्या मया ध्रुवम्।**
**पुरा स्म मणिमूर्तिस्तु चतुर्द्धाऽवस्थितो हरिः॥**

स्कन्द.वैष्णव.उ.पु.14.43

स प्रतिमा इन्द्रनीलममी सर्वोत्कृष्टा जुमनोहरा च आमीत्। यस्याः दर्शनेन मानवाः निष्कामाः सन् श्वेताख्यं भुवनमनायासेन अव्रजन्। एतस्मात् कारणात् कार्यरहितः यमः भगवन्तं प्रार्थितवान्, तदा यमस्य प्रार्थनया भगवाम् प्रतिमामेतां जातरूपपरिच्छेदैः वल्लिकैः गोपितः

**नीलाचलम्प्रयात्येष दिदृक्षुर्नीलमाधवम्।**
**अन्तर्धानं गतो ह्येष यमेन प्रार्थितो विभुः ॥**

(स्कन्द-वै 4/38)

इन्द्रनीलमणिमयीप्रतिमायाः अन्तर्धाने सति अत्र समागतः राजा इन्द्रद्युम्नः एव पुनः भगवतः दारुमयीं मूर्तिं विधाय अत्र प्रतिष्ठापयामास। अत एव वर्तमान जगन्नाथमन्दिरस्य प्रतिष्ठाता अबन्तिकाधिपतिः राजा इन्द्रयुम्नः एवास्ति।

उक्तञ्च-

**एकदारूससमुत्पन्नश्चतुर्धा सम्भविष्यति।**
**दारवप्रतिमानानि विश्वकर्मा धरिष्यति।**
**प्रतिष्ठापयिता त्वां हि इन्द्रधुम्नः प्रसाधितः॥**

स्कन्द.पु.4.60.61

**<u>पुरुषोत्तमदर्शनेन फलम</u> -**

अस्य पुरूषोत्तमस्यार्थः क्षेत्रं जगन्नाथश्च बोधयति अनयोः दर्शनेन समफलम् अश्नाति।

पुरुषोतमे श्रीपुरुषोतमस्य दर्शनेन कीट्टक फलालाभो भवतीति प्रायशो बहवो न जानन्ति। श्री पुरुषोतमक्षेत्रं हि सकलहिन्दु-साम्प्रदायिकानां तीर्थस्थानम्। यावन्ति तीर्थानि क्षेत्राणि च भरतखण्डान्तः पातिनि, तन्मध्ये तत्क्षेत्रं सर्वोत्तमम्। सर्वापेक्षया प्रतिवत्सरं समधिकलेकानां समागमोऽत्र दृश्यते। तीर्थानुसरणस्य पुरुषार्थसाधन सर्वथा अस्त्येव।

यथा महाभारते -

**तीर्थाभिगमनं पुण्यं यज्ञैरपि विशिष्यते।**
**अनुपोष्य त्रिरागाणि तीर्थान्यनभिगम्य च।**
**'अदत्वा काञ्चनं गाश्च दरिद्रो नाम जायते।**
**अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः।**
**न तत्फलमवाप्नोति तीर्थाभिगमनेन तत्॥**

अत्र मार्कण्डेयपुष्करिणी, श्वेतगङ्गा, रोहिणीकुण्डं, महोदधिः, इन्द्रद्युम्नश्चास्ति, यत्र स्नात्वा मुक्तिं लभते पुनश्चात्र जन्म नैव जायते। यथा-

**मार्कण्डेयावटेऽकृष्णे रोहिण्याश्च महोदधौ।**
**इन्द्रद्युम्नसरः स्नात्वा पुनर्जन्म न लभ्यते॥**

विभिन्नासु अवस्थासु भगवतः श्रीजगन्नाथस्य दर्शनमतीव महत्वपूर्णम्। रथारूढं जगन्नाथं दृष्ट्वा पुनर्जन्म न लभ्यते इत्युक्तिरतीव प्रसिद्धा एव।

यथा ब्रह्माण्डपुराणे -

**दोलारूढं जगन्नाथं मध्यस्थं च जनार्दनम्।**
**रथस्थं वामनं दृष्ट्वा पुनर्जन्म न विद्यते॥**
**य एष प्लावते दारू सिन्धो पारे ह्यपौरुषम्।**
**तमुपास्य दुराराध्यं मुक्तिं यान्ति सुदुर्लभाम्॥**

(स्क. पु-पु/21/3)

सिन्धुतीरस्थं पुर्यामेव जगन्नाथमाश्रित्य जनाः सुदुर्लभा मुक्ति यान्ति। अतः प्रमिद्धश्लोकः विद्यते -

**सर्वेषां च देवानां राजा श्रीपुरुषोत्तमः।**
**सर्वेषां च क्षेत्राणां राजा श्रीपुरुषोत्तमः॥**

**सन्दर्भग्रन्थसूची-**

1. श्रीमद्भगवद्गीता
2. स्कन्दपुराणम्
3. वायुपुराणम्
4. महाभारतम्